इयम् आकाशवाणी

दिनाङ्क: - 18.11.2024 सायम् - 06:20

मुख्यवार्ताः

- जीविंशति-शिखरसम्मेलनं अद्य सायं ब्राजीलस्य रियो-डी-जनेरियो इत्यत्र समारभत् ।

- शिखरसम्मेलने अस्मिन् प्रधानमन्त्री मोदी विभिन्नैः वैश्विक-विषयैः सह भारतस्य दृष्टिकोणं गतवर्षस्य घोषणापत्रस्य परिणामान् चापि उपस्थास्यति ।

- सर्वोच्चन्यायालयेन अद्य ग्रेप् इत्यस्य चतुर्थस्य चरणस्य अन्तर्गतं कठोरतम-प्रदूषण-निवारक-उपायानां कार्यान्वयनेन सह विलम्बस्य च विषये दिल्ली-सर्वकारम् उद्दिश्य प्रश्नः कृतः ।

- दिल्ली-प्रदेशस्य प्राक्तन: मन्त्री, आम-आदमी-पार्टीति दलस्य नेता च कैलाशगहलोत: अद्य भारतीय-जनता-पार्टीति दलेन सह संयुक्त:।

श्रीमोदी-जीविंशतिः

नवदशतमं जीविंशति-शिखरसम्मेलनम् अद्य सायं ब्राजीलस्य रियो-डी-जनेरियो इत्यत्र आधुनिक-कला-सङ्ग्रहालये समारभत् । सदस्य देशानां प्रमुखाः अन्ताराष्ट्रिय-सङ्घटनानां प्रतिनिधयः च विभिन्नसत्रेषु भागं भजिष्यन्ति अस्य वर्षस्य प्राथमिकतायाः क्षेत्रेषु चर्चिष्यन्ति

च। विश्वस्य अनेके नेतारः सम्मेलनेऽस्मिन् भागं ग्रहीतुं सम्मेलनस्थलं प्राप्तुवन्तः सन्ति। अस्मात् सम्मेलनादतिरिच्य श्रीमोदी विश्वस्य प्रमुखैः नेतृभिः सहापि उपवेशनानि कर्तुं प्रभवति। श्रीमोदिना सह अमेरिकादेशस्य राष्ट्रपतिः जो-बाईडेनः . चीनदेशस्य राष्ट्रपतिः शी-जिन्-पिंगश्च तेषु नेतृषु समाविष्टौ स्तः यौ द्विदिवसीयेऽस्मिन् शिखरसम्मेलने प्रतिभागितां करिष्यतः। प्रधानमन्त्री नरेन्द्रमोदी स्वकीयायाः त्रिदेशानां यात्रायाः द्वितीये चरणे अद्य प्रातः ब्राजीलदेशं सम्प्राप्तः ।भारत-ब्राजील-दक्षिणाफ्रीकायाश्च त्रिकुटिः जीविंशत्याः चर्चासु सक्रियतमास्ति। कार्यक्रमावधौ प्रधानमन्त्री मोदी विभिन्नेषु वैश्विक-विषयेषु भारतस्य दृष्टिकोणं प्रस्तोष्यति। अनेन सह श्रीमोदी जी-विंशत्याः गतवर्षस्य नवदिल्ल्यां समायोजितस्य शिखरसम्मेलनस्य घोषणापत्रस्य परिणामैः सह भारतद्वारा समायोजितस्य (वॉईस-ऑफ्-द-ग्लोबल-साउथ) इत्यस्य अपि परिणामानां चर्चां विधास्यति ।अस्य वर्षस्य शिखरसम्मेलनस्य ध्येयबिन्दुरस्ति एकस्य न्यायायुक्तस्य सातत्ययुतस्य च विश्वस्य निर्माणम् इति।

ब्राजील-राजदूत-साक्षात्कारः

ब्राजीले भारतीय-राजदूतः सुरेश-के-रेड्डी इत्येषः, सबलं प्रोक्तवान् यत् भारतं क्षेत्रस्य नेतृत्वरूपेण वैश्विक-दक्षिण-देशानाम् हितरक्षणार्थं अन्यदेशैः सह सम्वादं कुर्वदस्ति। जी-विंशति इत्यस्य शिखरसम्मेलने भागं ग्रहीतुं प्रधानमन्त्रिणः मोदिनः ब्राजीलयात्रायाः विषये आकाशवाण्या सह जाते विशेष-साक्षात्कारसम्वादे श्रीरेड्डी-वर्यः अवदत् यत् ब्राज़ीलेन दक्षिण-आफ़्रिका-देशैः च सह जी-20 ट्रोयका इत्यस्य सदस्यत्वेन भारतं संयुक्तरूपेण समूहस्य कार्याचरणं आकारं प्रति नयति। साक्षात्कारे, भारतीय-राजदूतः जी-विंशति-शिखरसम्मेलनं, भारत-ब्राज़ील-सम्बन्धानां सुदृढीकरणं, वैश्विक-सहयोगस्य पोषणम् चेत्यादिषु विषयेषु अपि सम्वादम् अकरोत्।

निर्वाचनप्रचाराभियानम्

झारखण्ड-महाराष्ट्रयोः विधानसभा-निर्वाचनाय प्रचाराभियानम् अद्य सायं समाप्तम् अभवत् । झारखंडे विधानसभा-निर्वाचनस्य द्वितीये चरणे अष्ट-त्रिंशत्-निर्वाचनासनेषु मतदानं भविष्यति , महाराष्ट्रस्य च सर्वेषु अष्टाशीत्यधिक-द्विशत-निर्वाचनासनेषु एकस्मिन् चरणे मतदानं भविष्यति । चतुर्षु राज्येषु पञ्चदश-विधानसभा-क्षेत्राणाम् उपनिर्वाचनाय अपि प्रचाराभियानं समाप्तम् अभवत् । उपनिर्वाचनेन सह झारखण्ड-महाराष्ट्रयोः विधानसभा-निर्वाचनम् आलक्ष्य मतानां गणना शनिवासरे भविष्यति ।

विराम:

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।

दिल्ली-प्रदूषणम्

दिल्ल्यां राष्ट्रीय-राजधानीक्षेत्रे च वायोर्गुणवत्ता इतोऽपि अधोगता , अद्य अपराह्णे एक-वादनं यावत् (ए. क्यू. आई.) इति वायुगुणसूचकाङ्कः नवत्युत्तर-चतुश्शततमस्य स्तरम् अत्यक्रामयत् । केन्द्रीय-प्रदूषण-नियन्त्रण-संस्थानम् इत्यस्य अनुसारं दिल्ल्याः केषुचित् भागेषु वायुगुणसूचकाङ्कः पञ्चशततम-मितः संसूचितः । दिल्ल्यां राष्ट्र-राजधानीक्षेत्रे च वायोर्गुणवत्तायाः गम्भीरस्थित्या ,प्रदेशे दृश्यता न्यूना सञ्जाता , अनेकाः रेलयानसेवाः विमानसेवाः च बाधिताः सञ्जाताः । प्रायः एकादश-विमानयानानि विलम्बितानि, सप्तविमानानां च यात्रामार्गाणि परिवर्तितानि सन्ति । उत्तर-रेल-विभागेन संसूचितं यत् त्रयोदश रेलयानानि सविलम्बं प्रचलन्तीति । दिल्ली-विमान-स्थानक-प्राधिकरणेन यात्रिणः परामृष्टाः सन्ति यत् त स्वविमानसेवाप्रदातृभिः सह सम्पर्कं कुर्युः , यतः निम्नदृश्यता अद्यापि

वर्तते येन विमान-परिचालनं प्रभावितुं अर्हति। भारतीय-ऋतु-विज्ञान-विभागेन पूर्वानुमानं व्यक्तीकृतम् अस्ति यत् दिल्ल्यां राष्ट्रीय-राजधानीक्षेत्रे च आगामि-दिवसेषु, रात्रौ प्रातःकाले च धूमाच्छादः, अल्प-धूमाच्छादः च भवितुम् अर्हति । एतदतिरिच्य सर्वोच्चन्यायालयेन अद्य ग्रेप् इत्यस्य चतुर्थस्य चरणस्य अन्तर्गतं कठोरतर-प्रदूषण-निवारक-उपायानां कार्यान्वयनस्य विलम्बस्य च विषये दिल्ली-सर्वकारम् उद्दिश्य प्रश्नः कृतः । न्यायालयेन प्रोक्तं यत् पूर्वानुमोदनं विना निवारक-उपायान् न्यूनीकर्तुं न अनुमतिः न प्रदास्यते इति ।

कैलाशगहलोत:- भाजपा

दिल्ली-प्रदेशस्य प्राक्तन: मन्त्री, आम-आदमी-पार्टीति दलस्य नेता च कैलाशगहलोत: अद्य भारतीय-जनता-पार्टीति दलेन सह संयुक्त:। अवसरेऽस्मिन् भारतीयजनता-पार्टीति दलस्य वरिष्ठ: नेता मनोहरलाल खट्टर:, राष्ट्रिय-उपाध्यक्ष: बैजयन्त-पाण्डाश्च दिल्लीप्रदेश-कार्यालये दिल्लीप्रदेशाध्यक्षेन वीरेन्द्रसचदेवा इत्यनेन सह उपस्थितौ आस्ताम्। ह्य: एव श्रीगहलोतेन आपेति दलात् त्यागपत्रं दत्तमासीत्। तेन आपेति दल संयोजकाय अरविन्दकेजरीवालाय त्यागपत्र-दानानन्तरम् उक्तं यत् दलमिदं सम्प्रति गभीर-संकटानां साम्मुख्यं करोतीति। तेन एतदपि उक्तं यत् राजनैतिक-महत्वाकांक्षा: दलस्य संकल्पान् समुल्लंघयन्त्य: सन्ति, जनानां बहुविध-अपेक्षाश्च अपूर्णा: एव सन्तीत्यपि।

एस्-बी-आई-सीतारामन्

केन्द्रीय-वित्तोद्योगमन्त्रिणा निर्मलासीतारामन् इत्यनया अद्य भारतीय-स्टेट-बैंक इत्याख्यस्य वित्तागारस्य अतुलनीयायाः विकास-गाथायाः प्रशंसा कृता । मुम्बई-नगरे अस्य कोशागारस्य मुख्य-शाखा-भवने शताब्दसमारोहे वित्तमन्त्रिणा प्रोक्तं यत् इम्पीरियल्-बैंक-ऑफ-इण्डिया इत्यस्य निर्माणाय त्रयाणां प्रमुखकोशागाराणां विलयः विहितः आसीत्, यो हि सम्प्रति स्टेट-बैंक-ऑफ-इण्डिया इत्यभिधेयेन विहितोऽस्ति। अस्य कोशागारस्य

विंशत्युत्तरैकोनविंशतिशततमे वर्षे अस्य कोशागारस्य आराष्ट्रं सार्ध-द्विशतसंख्याकाः शाखाः आसन् । सम्प्रति एताः शाखाः सार्धद्वाविंशतिसहस्राधिकाः सञ्जाताः सन्ति ।पञ्चषष्टि-सहस्राधिकं च एटीएम् इति कन्द्राणि सन्ति । यत्र पञ्चाशदधिककिजनाश्च अस्य कोशस्य ग्राहकाः सन्ति , सम्प्रति । तया अवसरेऽस्मिन् एतदपि समुल्लिखितं यत् एस्-बी-आई इति कोशः फॉर्च्यून-पञ्चाशत् इति सुविदित-सूच्याम् अनुस्यूतः एकमात्रं भारतीय-वित्तकोशः अस्ति ।

भारतम्- सकल-गृहोत्पादसमितिः

भारतेन अस्मै वर्षाय सप्तप्रतिशन्मितं जीडीपी इति सकल-गृहोत्पादस्य सप्त-प्रतिशन्मितस्य वृद्धिप्रतिशततया सह जी-विंशति इत्यस्मिन् नवोन्नतिं सम्प्राप्तम् । माईगोव इत्यनेन एकस्मिन् सामाजिक-संदेश-पटले एकस्मिन् सदेशे प्रोक्तं यत् एषा उपलब्धिः भारतस्य सुदृढार्थव्यवस्थां संसूचयति । इंडोनेशिया पञ्च-प्रतिशतं वृद्धिमितेन सह द्वितीये चीनश्च चतुर्दशमलव-अष्टप्रतिशन्मितेन वृद्धिमितेन सह तृतीये स्थाने वर्तेते ।

राष्ट्रिय-युवमहोत्सवः

राष्ट्रिय-युवमहोत्सवः अग्रिमवर्षे जनवरीमासस्य एकादश-द्वादश-दिनाङ्कयोः विकसित-भारत-युवनेतृसंवादः इत्यस्य रूपेण आचरिष्यते । केन्द्रीय-युवा-कार्य-क्रीडामन्त्री डा. मन्सुख-माण्डवीया अद्य नवदिल्ल्यां वार्ताहर-सम्मेलनं सम्बोधयन् एतत् उद्घोषितवान् । स्वस्य अभिभाषणस्य समये, श्री माण्डवीयः अवदत् यत्, एषः मञ्चः राष्ट्रस्य युवशक्तिं प्रधानमन्त्रिणः नरेन्द्रमोदिनः समक्षं संवादं कर्तुं, स्वकीयं दृष्टिकोणं उपस्थापयितुं च अवसरं प्रदास्यति इति ।

ज्योति-सुरेखा-लक्ष्यभेदन-स्पर्धा

लक्ष्यभेदन-स्पर्धायां, एशिया-स्पर्धानां वर्तमानविजेत्री ज्योति-सुरेखा-वेन्नम इत्यनया लक्ज़मबर्ग इत्यत्र जीटी ओपन इति स्पर्धायां महिलावर्गे स्वर्णपदकं समर्जितम् । प्रथमवारं जीटी ओपन-स्पर्धायां ज्योतिः सम्पूर्णे क्रीडासत्रे अत्युत्तमं प्रदर्शनं कृतवती ह्यश्च बेल्जियम-देशस्य सारा-प्रील्स इत्येषां पञ्च-चत्वारिंशदधिकैकशतं क्रीडनाङ्कान् विरुध्य सप्त-चत्वारिंशदधिकैकशतं क्रीडनाङ्कैः पराजित्य विजयमधिगतवती ।

नेपालभारतयो: सीमा-सुरक्षा

नेपालभारतयो: सीमा-सुरक्षा-समन्वयेति विषये एकम् उच्चस्तरीयोवेशनम् अद्य काठमाण्डू इति नगरे समारब्धम्। उपवेशनमिदं-सोमवासरान्तं यावत् प्रचलिष्यति। उपवेशनेऽस्मिन् सीम्न: पारक्षेत्रात् जायमानै: अपराधैस्सह परदेशीयानां नागरिकाणाम् अवैधप्रवेशावरोधे च चर्चा चर्च्यते। नेपालदेशेन सीमावर्तिषु क्षेत्रेषु अपराधनियन्त्रणाय सूचनानाम् आदान-प्रदानै: सह राजस्वस्य हानि:, मादकपदार्थानां मानवानाञ्च तस्कर्यादिषु नियन्त्रणाय प्रस्तावा: सन्ति समुपस्थापिता:। भारतस्य सीमा-सुरक्षा-बलस्य महानिदेशकेन अमृतमोहन-प्रसादेन नेपालस्य प्रतिनिधिमण्डलेन सह चर्चा कृता। उपवेशनेऽस्मिन् सशस्त्र-आरक्षि-बल-प्रमुखेन सह गृहमन्त्रालस्य, राष्ट्रिय-निरीक्षण-संघस्य, सर्वेक्षण विभागस्य, विदेशमन्त्रालयस्य च वरिष्ठाधिकारिभिस्समं उच्चस्तरीय-सुरक्षाधिकारिणश्च परातिभाग्यं कुर्वन्त: सन्ति। भारतीय-प्रतिनिधि-मण्डलेन ह्य: गृहमन्त्रिणा रमेशलेखकेन सह सम्पर्को विहित:। नेपालदेशस्य गृहमन्त्रिणा उक्तं यत् सीम्न: पारङ्गतै: नागरिकै: सह सम्मानगरिमाभ्यां सहैव व्यवहर्तव्य:। नेपालभारतयोर्मध्ये शताब्दश: पुरातना: सम्बन्धा: सन्ति, एतादृशै: उपवेशनैश्च उभयोर्देशयो: सम्बन्धा: इतोऽप्यधिकतया प्रगाढभूता: भविष्यन्तीति।

।।इति वार्ता:।।